M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. -

No. Ser. 1335

Title: Kalakal[illegible]ha Nirnaya

1335

Incomplete

:	:	Kārakārtha Nirnaya	: Title
:	:	Bhavananda Siddhanta Vāgīśa.	: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
1335 :	:		: Remarks

श्रीगणेशायनमः नत्वाश्रीकृष्णचरणौ कारकाद्यर्थनिर्णयः श्रीभवानंदसिद्धांतवागीशेनप्रकाश्यते १ क्रियानिमित्तंकारकमितिनसामान्यलक्षणं
संप्रदानादावनुमितिप्रकाशनद्वारेवतंडुलादिसंपादनद्वारासंबंधिनोपिपाकादिक्रियानिमित्तत्वेनसंबंधिनि मैत्रस्यतंडुलंपचतीत्यादौ मैत्रादाव
तिव्याप्तेः किंतु विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणंकारकत्वं क्रियानिमित्तत्वसहितंतुमुख्यं स्तोकंपचतीत्यादौ क्रियाविशेषणे ५
व्याप्तिवारणाय विभक्त्यर्थद्वारेति मैत्रस्यपचतीत्यादौ मैत्रसंबंधित्वेनपाके अन्वेति षष्ठ्यानामार्थ[illegible]कांक्षतयाक्रियायाअपिकर्मादिकारक
साकांक्षतयापरस्पराकांक्षाविरहात् किंतुतंडुलमित्यध्याहारेणमैत्रस्यतंडुलंपचतीत्यन्वयबोधः ओदनस्यभोक्ता मैत्रस्यपाकइत्यादौ कर्मत्वक
र्तृत्वेनकारकविभक्तिःरेवकर्तृकर्मणोः कृति इत्यादिना तद्विधानात् अतएवसंबंधत्वेनास्तिक्रियायोगाभावादितिशाब्दिकाः यदिचगुरु
विपत्तौ वृषलतपस्विदुर्गतानांप्रतिकुर्वीतभिषक्सुभेषजैः इत्यादिप्रयोगेतु विनापिनाम। ×स्यकारक× ध्याहारं षष्ठ्यर्थसंबंधोन्वीयते तदाकर्तृत्वक
र्मत्वादिषष्ठ्यन्यतमद्वाराक्रियान्वयित्वंविवक्षणीयं तत्रक्रियाश्रयत्वंकर्तृत्वमितिवैय्याकरणाः तेषामयमाशयः यद्धातूत्तराख्यातेनय
गाद्यसमभिव्याहृतेनयद्धात्वर्थान्विततादृशधर्मवत्त्वंबोध्यते तादृशधर्मवत्त्वं तद्धात्वर्थक्रियाकर्तृत्वं एवंचपचतीत्यादौ पाकानुकूलव्यापारवत्त्वं जानातीत्या
दौ आश्रयत्वंच नश्यतीत्यादौ प्रतियोगित्वंच तत्क्रियानिरूपितं तत्क्रियाकर्तृत्वं यगाद्यसमभिव्याहृतेनेतिविशेषणात् पच्यतेतंडुलइत्यादौ पाकजन्य
फलाश्रयत्वेनतंडुलादेर्बोधनात् नतस्यकर्तृत्वं काष्ठैः स्थाल्याभोदनंपचतीत्यादौ करणाधिकरणकर्मणांक्रियान्वितधर्मवत्त्वसत्वेपि सधर्मो नाख्यात
नप्रतिपाद्यः यदिचतादृशव्यापारतात्पर्येणाख्यातं काष्ठंपचति स्थालीपचतीत्यादौ तदातेषांकर्तृत्वमेव तथापच्यतेओदनः स्वयमेवेत्यादौ कर्म
कर्तरिओदनादेः कर्मणोपिकर्तृत्वंतत्रहि स्ववृत्तिव्यापारजन्यपाकजन्यफलशाली ओदनइति ओदनेपदोत्तरप्रथमायाव्यापारोलक्षणयार्थः यद्वाव्या
पारसामान्यमाख्यातस्यार्थः व्युत्पत्तिवैचित्र्यात्आश्रयत्वं यगादिसमभिव्याहृतआख्यातार्थेव्यापारेप्रथमान्तार्थस्याधेयतासंबंधेनान्वयः धात्वर्थस्य
विशेषणतयातत्राख्यातस्यव्यापारवाचित्वादोदनान्वितताद्दशव्यापारस्यापियगाद्यसमभिव्याहृतप्रतिपाद्यत्वात् ओदनःस्वपचतीत्यादिप्रयोगस्य

फलव्यापारयोर्धातुराश्रयेतुतिङः स्मृताः फलेप्रधानंव्यापारस्तिङर्थस्तुविशेषणमितिवैय्याकरणमते।

का॰वा॰ साधुतायां अभावेपि तादृशव्यापारे तज्जन्यप्रतिपत्तिविषयतायोग्यतायाः अनपायादिति पाचयतीत्यादौ पाकानुकूलव्यापारो णिजर्थः तद
नुकूलव्यापारश्च आख्यातस्येति तदाश्रय एव कर्ता स्वतन्त्रः कर्तेति पाणिनिसूत्रमपि एतत्पारतन्त्र्येव व्याख्यातमिति तन्न अचेतनप्रयोगकर्तृत्वीय
त्राप्तियुक्तानां स्वरसतः कर्तृपदाप्रयोगात् कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वमिति निष्कर्षं ताद्वेघसंयोगादिरूपव्यापार
जनके कुठारादौ नातिव्याप्तिरित्यपरे तदप्यसत् ईश्वरप्रयोज्यानुसंसारिणां तत्तत्क्रियासु कर्तृत्वापत्तेः अप्रयोज्यत्वे यदि फलानुकूलतज्जन्यव्या
पाराश्रयत्वं तदा दण्डादिसंयोगादिरूपव्यापाराश्रयकृतिकुलालादौ अव्याप्तिः अन्यच्च दुर्वचमत्राह अनुकूलकृतिधर्मवत्त्वं कर्तृत्वं पाकानुकूलव्या
पारवत्प्रतिसंधानेपि काष्ठादौ तान्त्रिकाणां स्वरसतः कर्तृपदाप्रयोगात् कृती कृति[illegible]भागादिना कृधात्वर्थत्वार्थकत्वे निश्चित आश्रयार्थ
उं कर्तृत्वे कृधातुव्युत्पन्नकर्तृपदस्य कृत्याश्रयत्वबोधकत्वाच्च अचेतने च कर्तृपदप्रयोगो गौणः यदि च अन्यविषयकृतिजन्यनान्तरीयकमत्राभिमतं
मयान कृतं इति व्यपदेशाभिमुखव्यक्तत्वं तदा तद्विषयकत्वेनापि कृतिर्विशेषणीया न चैवं तद्विषयककृतिमत्त्वमेव कर्तृत्वमस्तु गुरुत्व
स्यारोपितकलनादौ तद्विषयककृतिमत्त्वेपि तोलनक्रियायामनिष्पन्नतो कर्तृपदाप्रयोगात् तत्तद्विषयत्वं च साध्यत्वेन बोध्यं तेन भोजनकृते
रुद्देश्यत्वेन सुखविषयत्वेपि तत्करणे न सुखकर्तृत्वं अस्मदादिपौरुषकृतेः कदाचिदपि ईश्वरकर्तृत्वमिष्टमेव न चैवं ईश्वरः पचतीतिस्या
त् तथाविधविवक्षाया मिष्टत्वात् कार्यत्वानवच्छिन्नजन्यतानिरूपितमसाधारणमनुकूलत्वमेव वा लक्षणघटकमित्याहुः कर्मत्वं तु
न करणव्यापार्यत्वं तद्धि करणजन्यक्रियानुकूलव्यापाराश्रयत्वं तच्च दात्रे[illegible]

णधात्वर्थलुनातीत्यादौ हस्तादिकरणव्यापार्ये दात्रेतिव्याप्तं नापि परसमवेतक्रियाजन्यफलशालित्वं गमिपतनयोः कर्मत्वस्य पूर्वदेशे न देशे संयोगे करस्मि
न्देशे पूर्वापरयोः पवनयोः कर्मत्वप्रसंगात् एवं द्वीपवृद्धते दुग्धादौ वृद्धेः स्वसमवापचयस्य परस्पराजालीरसादिफलकत्वात् जन्यफलाश्रयं आनिव्या तीरे
[illegible]मत्राहुः सजातीयासम्भवती नास्य पदमात्रेणार्थः तर्हि सजातिगकृतीसनयोः प्रतीयोरविशेषकश्चिदभ्युपेति एवं सजातिविभागेन
गामेके तदुन्नयोगेन पततध्वः संयोगेन अवच्छिन्नत्वात्: स्यन्दादावव्याप्तिः तथा च तत्तद्धात्वर्थतावच्छेदकफलशालित्वं तत्तद्धात्वर्थकर्मत्वं
स्पन्दे धात्वोर्फलावच्छिन्नव्यापारबोधकत्वात् न पूर्वापरयोः संयोगस्य च कर्मत्वं अत एव फलावच्छिन्नव्यापारबोधकत्वादेव धातूनां सक
[illegible] र्मकत्वं अकर्मकत्वं प्राकृत्यं स्वविषयपदार्थाभिधानजानातीत्यादीनां विषयित्वस्य रूपानिर्णयार्थत्वात् नामार्थान्वयः गौणत्वकर्मकत्वं घटं जाना
[illegible] द्वितीयादि विषयित्वोपस्थितो घटविषयकज्ञानाश्रयत्वानुरूपसन्नमबोधो[illegible]दत एव ज्ञातधातोरकर्मकत्वं तदुपस्थितपदेन नामा
[illegible] ज्ञानं नान्यबोधात् अभितुं जानीमि पूर्वजनाय यतते इति प्रयोगात् तत्त्वमेव तादृशधातुप्रयोगे कर्मप्रत्ययाभावात् ज्ञातो भोजनमयतततु
स्पन्दनेन तृणप्रयाति तत्र ज्ञाति खगपदत्वादौ धात्वर्थतावच्छेदकसंयोगविभागरूपफलशालित्वेपि